॥श्रीगणेशाय नमः॥ भद्रं कर्णेभिः शृणुयामदेवाः॥ ॐ
सुशांतिः॥ हरिः ओम्॥ ओमित्येतदक्षरमिदꣳ स
र्वंतस्योपव्याख्यानं भूतं भवद्भविष्यदितिसर्वं
मोंकारएव॥ यच्चान्यत्त्रिकालातीतंतदप्योंकारएव॥
सर्वंह्येतद्ब्रह्मायमात्माब्रह्मसोयमात्माचतुष्पा
जागरितस्थानोबहिःप्रज्ञःससप्तांगएकोनविं
शतिमुखःस्थूलभुग्वैश्वानरःप्रथमपादः॥ स्व
प्नःस्थानोंतःप्रज्ञःससप्तांगएकोनविंशतिमुखः
प्रविविक्तभुक्तैजसो॥द्वितीयःपादः॥ यत्रसुप्तो
नकंचनकामंकामयतेनकंचनस्वप्नंपश्यति

तस्सुषुप्तसुषुप्तस्थानएकीभूतःप्रज्ञानघनएवा
नंदमयोह्यानंदभुक्चेतोमुखःप्राज्ञस्तृतीयःपादः॥
एषसर्वेश्वरएषसर्वज्ञएषोंतर्याम्येषयोनिःसर्व
स्यप्रभवाप्ययौहिभूतानांनांतःप्रज्ञंनबहिःप्र
ज्ञंनोभयतःप्रज्ञंनप्रज्ञानघनंनप्रज्ञंनाप्रज्ञम
दृश्यमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदे
श्यमेकात्म्यप्रत्ययसारंप्रपंचोपशमंशांतंशि
वमद्वैतंचतुर्थंमन्यंते॥सआत्मासविज्ञेयःसो
यमात्माध्यक्षरमोंकारोधिमात्रंपादामात्रामा
त्राश्चपादाः॥अकारउकारोमकारइतिजागरि

तस्थानोवैश्वानरोकारः प्रथमामात्रा आप्तेरादि
मत्वाद्वाआप्नोतिहवैसर्वान्कामानादिश्चभव
तियएवंवेद॥स्वप्नस्थानस्तैजसउकारोद्विती
यामात्रोत्कर्षाद्वुभयत्वाद्वोत्कर्षतिहवैज्ञानसं
ततिंसमानश्चभवतिनास्याब्रह्मवित्कुलेभ
वतियएवंवेद॥सुषुप्तस्थानः प्राज्ञोमकारस्त
तीयामात्रामितेरपीतेर्वामिनोतिहवाइदꣳ
सर्वमपीतिश्चभवतियएवंवेद॥अमात्रा
श्चतुर्थोव्यवहार्यःप्रपंचोपशमःशिवोद्वैतएवं
ओंकारआत्मैवसंविशत्यात्मनात्मानंयएवंवेद॥

भद्रंनोऽपिवातयमनः॥ शांतिः३॥ इतिमांडूक्यो
पनिषदंसमाप्तं॥ प्रथमोऽध्यायः॥ ॐ भद्रंकर्णे
भिः ॐ शांतिः३॥ वैतथ्याख्यः॥ द्वैतथ्याख्यः॥
अलातशांतिः॥

२